This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ रसमंजिरीपुस्तकं॥

Acc. No. ~~6911~~ M-1868
Title - रसमञ्जरी
Author - भानुदत्त
Date - ?
Sub - ?
Folio - 14
Xerox - 28

KKSU LIBRARY
RAMTEK
441 106
M-1868
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसमं०

॥१॥

श्रीगणाधिपतयेनमः आम्रीयंचरणेदृष्टाप्तिपुरतोनिम्नोन्नतायंभुवि स्वयेनैवकरेणकर्षति
तरोःपुष्पंसमाशंकया तस्येकिंचमृगत्वचाविरचितेतिद्वाति भागैर्निजैरंतष्प्रेमभरालसप्रिय
तमामंगेरुचानोहरः १ विद्वत्कुलमनोभृंगरसस्यासंग्रहेतवे एषाप्रकाश्यतेश्रीमद्भानुदार
समंजरी २ तत्ररसेषुशृंगारस्याभ्यर्हितत्वेन तदालंबनविभावनत्वेनायिकातावत्निरूप्यते
साचत्रिधा स्वीयापरकीयासामान्याचेति तत्रस्वामिन्येवानुरक्तास्वीया नचपरिणीतायांप
रकामित्वामनिव्याप्तिः अत्रपतिव्रतायाएवलक्ष्यत्वात् तस्याश्चपरकामितयापरकीयात्वम
पिसमायाति अतिव्याप्तिलक्षणंतु अलक्ष्येलक्षणगमनमतिव्याप्तिः अस्याश्चेयं पतिशु-
श्रूषाशीलसरलगमार्जवंक्षमा यथा गतागतकुतूहलेनयनयोरपांगावधिमितंकुलनते
भ्रुकामधरएवविभ्राम्यति वचः प्रियतमकृतेरतिधिरेवकोपक्रमः कदाचिदपिचेतसाम
तसिकेवलंमज्जति ३ सीयानुत्रिविधा मुग्धामध्याप्रगल्भाच तत्रांकुरितयौवनामुग्धा सा
चाज्ञातयौवना ज्ञातयौवनाच सैवलज्जाभयपराधीनरतिर्नवोढा सैवसप्रश्रयाविश्रब्ध
वोढा अस्याश्चेयं लज्जामनोहरकोपेमार्दवंनवविभ्रमेसम्मोह मुग्धायथा आज्ञप्तेकि
लकामदेवबरणीपालेनकालेशुभेवस्त्रंवास्त्रविविधंविकस्यतिनतोनासरायमेरीदृशः
दृष्ट्वाखंजनचातुरीमुखरुचासौधाधरीमाधुरीवाचाकिंचरुधासमुद्रलहरीलावण्यमा

॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

2

मन्यते ॥ ४ ॥ अज्ञातयौवनायथा ॥ नीरान्तीरमुपागतास्त्रवणयोः सीम्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति
ज्ञातुं करं न्यस्यति ॥ शैवालां कुरशंकयाशशिमुखी रोमावलीप्रोच्छ्रितिश्रांता सीतिमुहुः सखीमविदितश्रो
णीभरा पृच्छति ॥ ५ ॥ ज्ञातयौवनायथा ॥ स्वयंभूः शंभुरंभोजलोचने त्वत्पयोधरः ॥ नखेन कस्य धन्यस्य च
द्रचूडो भविष्यति ॥ ६ ॥ नवोढायथा ॥ हस्तेघटतापि शयने विनिवेशितापि क्रोडीकृतापि यततेबहिरेव गंतुं ॥
जानीमहे नववधूरयतस्य वश्यायः पारदं स्थिरयितुं क्षमते कमतेकरेण ॥ ७ ॥ विश्रब्धनवोढायथा ॥
दरमुकुलितनेत्रपालिनीवीनियमितबाहुकृतोरुयुग्मबंधं ॥ करकलितकुचस्थलं नवोढा स्वपिति स
मीपमेत्य कस्य पुण्यैः ॥ ८ ॥ स मानलक्षणामध्यासैवाचानिप्रश्रयातिविश्रब्धानवोढा ॥ अस्याश्चे
ष्टा ॥ सागसिप्रियसिधैर्यवक्रोक्तिरधैर्यपरुषवाक् ॥ मध्यायथा ॥ स्वापेप्रियाननविलोकनहानिरेवस्वा
पच्युतौप्रियकरग्रहणप्रसंगः ॥ इत्थंसरोरुहमुखीपरिचिंतयंति स्वापं विधातुमपिहातुमपिप्रपेदे ॥ ९ ॥ प
तिमात्रविषयः केलिकलापकोविदाप्रगल्भा ॥ कुलटायां वेश्यायां पतिमात्रविषयलोभावान्नतत्रातिव्याप्तिः
अस्यांस्मुरतिप्रीतिरानंदात्संमोहः ॥ संस्पृश्यस्तनमाकलय्यवदनं संश्लिष्यकंठस्थलं निःपीयाधर
बिंबमंबरमपाकृष्यव्युदस्यालकं ॥ देवस्यांबुजिनीपतेसमुदयंजिज्ञासमानेप्रिये वामाक्षीवसनांचलैः श्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वणयोनीलोत्पलंनिहुते॥१०॥द्वितीयंयथा॥न रव क्षतमुरस्यलेधरतलेरदस्यव्रणंच्युतावकुलमालिका
स्त्री॥२ विगलिताचमुक्ताव ॥रतांतसमये मयासकलमेतदालोकितंस्मृतिःक्वचरतिःक्वचक्वचतवाति
शिक्षाविधिः॥११॥मध्याप्र गल्भेमानावस्थायांप्रत्येकंत्रिविधेति॥धीराअधीराधीराधीरावेति॥
व्यंग्यकोपप्रकाशाधीरा॥अव्यं ग्यकोपप्रकाशाअ धीरा॥व्यंग्याव्यंग्यकोपप्रकाशाधीराधीरा॥द्व
यांस्तुविशेषः॥मध्याधीरायाःकोपस्यगीर्व्यंजिका॥अधीरायाःपरुषवाक्॥धीराधीरायाश्चरणोदास्यं
तर्जनताडनादिकोपस्यप्रकाशके॥धीराधिभेदाःस्वीयायाएवनपरकीयायाइतिप्राचीनलेखनमात्रमा
त्रं॥धीरत्वमधीरत्वंतदुभयंमाननियतंपरकीयायामानश्चेषामप्यावश्यकत्वात्॥मानश्चनपरकीया
याइतिवक्तुमशक्यत्वात्॥मध्याधीरायथा॥लोलालिषु जेव्रजतोनिकुंजेस्फारावभूवुःश्रमबारि
धाराः॥देहेसमीहेभवतोविधातुंधीरंसमीरंनलिनीदलेन॥१२॥मध्याधीरायथा॥जातस्तेनिशिजा
गरोममपुनर्नेत्रेजसौरिमानिःपीतंभवतामधुप्रियतमेध्यापूर्णितंमेमनः॥भ्राम्यद्भृंगवरैर्निकुंजभवने
लब्धंत्वयाश्रीफलंपश्चेषुष्पुनरेषमांबहुवरैःक्रूरैःशरैःकृंतति॥१३॥मध्याधीराय

हेरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या कांतानुरागं चतुरेसिमनोहरेहितायोहिकिंचनवयौवनभूषितोसि इत्यनिजाद्यसदृशा
वदनेप्रियस्यनिश्वस्यकाप्यलुलितानिहितादृगंताः प्रौढाधीरयथा तोतस्यंभेजसेनजेत्यसि
सुकाकारलुकारा जिरोहकृपातंकुरुषेनकापरिजनेकोपप्रकाशछलात् इत्यंकेनकगर्भजो
रिदयितेकोपस्यसंगोपनंतस्यादेवतचेत्सुतःसहचरीकुर्वीतसाचिस्मितं प्रौढाअधीरयथा
प्रतिफलमवलोक्यस्वीयमिंदोःकलायंहरशिरसिपरस्याकस्मात्शंकमाना जिरिशमचलक
त्यानजीयामासकंपप्रचलकलयवत्काकेतिभाजाकरेण प्रौढाधीराधीरयथा तस्योपांतमुपे
युषिप्रियतमेवक्रीकृतजीवयाकाकुव्याकुलवाचिसाचिहसितस्फूर्जत्कपोलस्त्रिया हस्तन्यस्त
करेपुनर्मृजदृशालाकारसलालितप्रौढोपस्थमयूखमंसलतरुवोद्विस्फारिताहस्तयः एतेचधी
राधिपउभेद्वाःद्विधाज्येष्ठाकनिष्ठाच धीराज्येष्ठाकनिष्ठा अधीराज्येष्ठाकनिष्ठा धीराधीराज्येष्ठा
कनिष्ठा परिणतवेसतिभर्तरिकनेहाज्येष्ठा परिणतवेसतिभर्तरिनवनेहाकनिष्ठा अधि
कनेहासत्यूतनेहासुसामान्यवनितासुनानिद्याप्तिः परिणतपहिनयौवनीनाह धीराज्येष्ठा
कनिष्ठायथा एकस्मिन्शयनेसरोरुहदृशोर्विज्ञायनिद्रांतयोरेकांपल्लवितावगुंठनपटासुकं
धरोहस्तकान् अन्यस्यासविधंसमेत्यनिभृतंत्यालोलहस्तांगुलिव्यापारैर्वसनांचलंचपलय
न्सापच्युतिकृत्प्रकाश अधीराज्येष्ठाकनिष्ठाचयथा अंतःकोपेकषायितेप्रियतमेपश्यन्ध

शफरीजल्प
मछः

परकीयासु ४ गुप्ते

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानिन्योः

नेकान्तनेपुष्पस्यावचयायनम्नवदनामेकां समायोजयन् अर्धोन्मीलितलोचनांचलचमत्कार
भिरामानन्तांमेरुडीधरपङ्कांनववधूमन्यांसमालिंगति धीरधीरज्येष्ठाकनिष्ठायथा वैयीशे
यीपरिग्रहजनहिलयोरेतादृशोः प्रीतयेरतिइंद्रमनंतकांतिरुचिरंमुष्टिद्वयेन्यस्तवान् एकस्याः
करतयनकरेप्रथमतोरतंपरस्याः प्रियोहस्ताइलिमिषास्स्पृशन्कुचतटीमानंदमाविंदति अ
एक [illegible] दपरपुरुषानुरागापरकीया साचद्विविधा परोढा कन्यकाच कन्यकायाः पित्राद्यधीन
तयैवपरकीयता अस्याः गुणैर्वृत्तकलचेष्टा परोढायथा अयंरेवाकुंजःकुसुमशरसेवासमु
चितःसमीरोयंवेला [illegible] दूरविदलदेलापरिमलः इयंधात्रीहृद्यन्यानवजलदविन्यासच
तुरापराधीनंचेतःसखिकिमधिकंहिमगयते गुप्तविदग्धालक्षिताकुलटाअनुशयानामुदि
तापभृतीनांपरकीयायामेवांतर्भावः गुप्तविधा अतिरतगोपनावर्तिष्यमानरतगोपनाअ
तवर्तिष्यमाणरतगोपनाचेति त्रितयमपियथा श्वश्रूःकुप्यतुनिर्दिशंतुसुहृदोनिंदंतुचामातर
स्तस्मिन्किंतुनमंदिरेसखिपुनःसापोविधेयोमया अस्तोराक्रमणायकोणकुहरादुत्फालमातन्व
तीमाक्रीनखरैःखरैःकृतवतीकांकांनमेदृशं विदग्धाचद्विविधा वाग्विदग्धा क्रियाविदग्धा
च वाग्विदग्धायथा तिविरतमतमसमेत्रिवलीविचकितैरुद्विरलितोपकंठे पथिकसमुचि
तमलवादतीव्रेसवितरितत्रसरितटेतिवासः क्रियाविदग्धायथा दासायभवतनयेवदरीमपनेतु

॥३॥

मोघरी ।] [illegible]विशेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्याः कर्तव्यतायां सर्वलोकप्रसिद्धत्वं

मादिशति हे मंत्रे हरिणाक्षी पयसि कुठारं विनिहिपति लक्ष्मीं यथा यद्भूतं तद्भूतं यद्भूयात्तद
पि भूयात् यद्भवति तद्भवतु विफलस्तवोपायासः कुलशैलाः स्थैर्यं स्थैर्यं किरंति
पुरुषान् वर्षंति तोयधरः शैलः शाद्वलमुद्वमंति तरवः सृजंत्येते पुलकीयकान् त्रैलोक्येतरवः फ
लानि सुवते नेत्रारंभते जलान्धातः कातरमालपामि कुलटाहेतोस्त्वया किं कृते अनुशयानो यथा
वर्तमानस्थानविघट्टनेन भाविस्थानभावशंकयास्वाधिष्ठितशैलेकेतस्थलं भर्तुर्जीवनसुमालेन च
नुशयानो भवति प्रत्येकसुहृद्राणि तस्योपाशनवति चैत्रे निपतितपत्रेलवंगलतिकायाः सदृशः
कपोलपालीशिवशिवतालीदलमुत्तिलेभे ५ निद्रालुके किमिति मुग्धनिकपोतपोतव्याघूतनूतनम
हीरुहपल्लवानि तत्रापि तत्तिनवनानि कियंति संति विद्यत्तमस्यदहं प्रयाहि कर्णिक
स्तितरसालमंजरीपिंजरीकृतकपोलमंडलः निष्पतत्तयतकारिकारयारुद्यामेधुरिसुर्मिरीद्य
ते ३ मुदिताय यथा गोष्ठेषु तिष्ठति पतिर्वधिरानतेहतेत्र हृदयस्य चनपाटवमस्तियातुः इत्यनिश
प्यतरुणीकुचकुंभसौम्रिरेमंचकंचुकसुदेचितमातनोत कन्यकायथा किंचिकुंचितहारयष्टि
सरलभ्रूवल्लिसाचिस्मितंप्रोतभ्रोतविलोचनद्युति भुजापर्यस्तकर्णोत्पलं अंगुल्यास्फुरदंगुली
यकसुचाजंडेर्यकंद्रयनंकुकीणान्दपकन्यकासुकृतिनंसव्या जमालोकते चित्रमत्रोपाधिक
सकलपुरुषाभिरूपोसामान्यवनिता तन्वंगि मित्रेहि तिपलावतुरक्रायमेरवत्यामव्याप्ति

कर्णिस

जारसमूहगोमिनं

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तत्र चित्तमात्रोपाधेरभावादिति चेन्नैवं सात्विकस्मीरहीरादिहारिमहाराजेऽनुरक्तानुमहर्षौ
तिनावगम्यतेतत्रापि चित्तमात्रोपाधिरिति अथ प्रिलहरणं लक्ष्यैकदेशेलक्षणस्यावर्तनं सा
मान्यवनितायथा दृष्ट्वाप्रांगणसन्निधौकुचतटंहारमभ्यागतं वक्षोजौतनुतःपरस्परमिवाश्लि
ष्यंकुरंगीदृशः आनंदाश्रुपयांसिसुंचतिमुहुर्मीलाभिषाकुंतलोदृष्टिः किंचधनागमंकथयति
तुंकरंगीतिकंगच्छति एतत्प्रत्यसंभोगदुःखितावक्रोक्तिगर्वितामानवत्यश्चतिस्त्रीभवेति अ
न्यसंभोगदुःखितायथा वंदूतिनिरगाःकुंजंतनुपादीयसोऽहं किंशंकाभरणंदेहंदृश्यतेकथ
मन्यथा वक्रोक्तिगर्विताद्विविधा सौन्दर्यगर्विता प्रेमगर्विता सौन्दर्यगर्विताथथा कलयति
कमलोपमानमस्योः प्रथयतिवाचिसुधारसस्यसाम्यं सखिकथयकिमाचरामिकांतेसमजनि
तवसहिष्णुतेवहेषः प्रेमगर्विताथथा वपुषितवतनोतिरत्नभूषांप्रभुरितिधन्यतमासिकिं
ब्रवीमि सखितनुतयनांतरालभागुःकलयतिनेनविभूषणानिकांतः मानवतीयथा प्रिय
परावसूचिकाचेष्टामानः सचलघुमध्यमोगुरुश्च अस्यापत्तेयोलघुः कथ्यतेरपत्तेयोमध्यमः
कथ्यतेमापत्तेयोगुरुः अस्याश्चरसाभासः अपरस्त्रीदर्शनादिजन्यालघुः औचित्यवत्तनादि
जन्यामध्यमः अपरस्त्रीसंगजन्यागुरुः अपरस्त्रीदर्शनजन्यायथा त्वदंतुभिःकचनपिछि
लमंगमौशातोदरिकुचतटंकंटकितेविभाति अन्यांविलोकयतिभाषयतिप्रियेपिमानः कै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यति परं न वनान्तरिष्यः जोऽत्र सरलनजन्मा यथा यद्वोऽत्र सरलनं तत्र भ्रमो यदि तमन्यते
रेमाल्लिष्टालसं स्पर्शं शपथं न विकारय अपरांगनासंगजन्मा यथा दयितस्य निरीक्ष्य भस्ते
शंचरणालक्तकपिंजरं सपत्न्याः सुदृशो नयनस्य शोणभासः कृतिसुकाः शिशिरोपमा बभूवुः
इत्यः जोऽश अष्टाभिरवस्थाभिः प्रत्येकमष्टविधा प्रोषितभर्तृका खंडिता कलहांतरिता विप्र
लब्धा उत्कंठा वासकसज्जा स्वाधीनपतिका अभिसारिका चेति गणनादष्टाविंशत्यधिकशते
भेदा भवंति तासामपि उत्तममध्यमाधमगणनया चतुरधिकाशीतियुतं शतत्रयं भेदा भवंति
यक्षस्तासां दिव्यादिव्योभयभेदेन गणनया द्विपंचाशदधिकयुतं सहस्रं भेदा भवंति दिव्या इं
द्रादयः अदिव्या मालत्यादयः दिव्यादिव्याः सीतादयइति तन्न अवस्थाभेदे नैवनायि
कानां भेदात् जातिभेदे न भेदस्वीकारे नायकानामप्येवमनैक्यं स्यात् दिव्या इंद्रादयः अदि
व्या मानवादयः दिव्यादिव्या अर्जुनादयइति यद्यपि सुज्ञायां यथा धीरादिभेदा भावस्तथा विध
प्रज्ञासमन्यभावात् तथा अष्टविधभावो भवितुमर्हति तथापि प्राचीनलेखानुरोधेन नवो
दायामप्यासंबंधेन भेदाश्चवर्णनीयाः वस्तुतस्तु अष्टविध भेदो मध्यादौ दायामेव नवोदा
यां तथाविधप्रज्ञायभावादित्युक्तकात् देशांतरगते प्रेयसि संतापव्याकुला प्रोषितभर्तृका
पत्युर्विदेशगमनभावादुत्कंठा कलहांतरिता विप्रलब्धा सुनातिव्याप्तिः अस्याश्चेष्टा दशावस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा दृष्टनः संगसंजस्यौ जागरः कृशतारतिः ह्रीत्यागो मादमूर्छा ताइत्यंगदशादश
मुग्धा प्रोषितभर्तृका यथा दुःखं दीर्घतरं वहत्यपि सखीवर्गीयतो भाषते शेते कालेः शयनं स्व
जत्यपि पुनः शेते न कालज्ञया कंठे गद्गदवाचमंचति दृशौ वक्त्रे न वाष्पोदकं संतापं सहते
यदंबुजमुखी तद्दृश्चेतो भवः मध्या प्रोषितभर्तृका यथा वासस्तदेव वपुषो वलयं न देवह
स्तस्य सेवजघनस्य चरत्कांची वाचस्तदंगसुभगे सुरभौ समस्तमद्यापि कुंभवनितेस
खि किं निरातं प्रौढा प्रोषितभर्तृका यथा मालाकलंबुजदलमयी मौक्तिकी हारयष्टिः का
ञ्चीकिंचवयियदुपतेप्रस्थितेप्रस्थितेव अन्यद्भूमः किमिह वमनीवनितेवानवेति ज्ञातुंवा
होरहहवलयं पाणिमूलं प्रयाति परकीया प्रोषितभर्तृका यथा श्वश्रूः पश्यदलं दहति
नहि विभ्रूसंज्ञया गृह्यते सद्योमर्मरशंकया न च तया संस्पृश्यते पाणिना यातुं कीचिदुहद्ग
णस्य वचसि प्रत्युत्तरं दीयते श्वासः किंतु न मुच्यते कुतवह क्रूरः कुरंगीदृशा सामान्यवनि
ता प्रोषितभर्तृका यथा विरहविदितमंतष्प्रेम विज्ञायकांतः पुनरपि वसतस्मादेत्यमेदास्य
तीति मरिचनिचयमश्रोर्न्यस्य वाष्पोदविंदून विसृजति पुरयोषिद्वारदेशोपविष्टा अन्यो
पभोगचिह्नितः पतिर्यस्याः समायाति सा खंडिता अस्या मुग्धा अस्फुटालापचिंतासंताप
निश्वासतद्दृष्टिभावाक्रमणादयः मुग्धा खंडिता यथा वक्षः किमुकुलिशांकितमिति किम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिप्रसूमिच्छेत्याः नयनेनकोटसदृशः प्रणेशः फणिनापिदष्टे मध्याखंडिताथथा व[illegible]होजवि
हितसुरेदयितस्यवीक्ष्यदीर्घनिश्वसनिजस्यनिनेवकिंचित् प्रातर्जलेनवदनंपरिमार्जयंती
वालाविलोचनजलानिनिरोधाति प्रौढाखंडिताथथा समुद्धीक्ष्यविपक्षपक्ष्मलदृशःपादेषु
जारक्तकेरात्रिप्रांतनमानतीकृतसुखीचित्रार्पितेवाभवत् इत्यंतोक्तवतीनवाकृतवतीनिश्च
सकोस्नेहशोप्रातर्मंडनमंडनाकरतलादादर्शमादर्शयत् परकीयाखंडिताथथा कांतंनिरीक्ष्य
वलयांकितकंठदेशमुक्तालतापरनियापरुषानवाचः दूतीसुखिस्मगदृशा सवलेहवुपरादूरा
त्परंनिदधिरेनयनांतपातः सामान्यवनिताखंडिताथथा उरसवपयोधरं कितमिदंकुतोमे
लग्नातोमयिनिधीयतांवसुपुराघदंगीकृतं इतिप्रचलचेतसः प्रियतमस्यकारात्रिया कराग
कनककंकणंकरतलात्समाकृष्यते पतिमवमन्यपश्चात्परितप्राकलहांतरिता अस्याश्चे
ष्टा भ्रांतिनिश्वासतापसंमोहजरपलापादयः मुग्धाकलहांतरिताथथा अनुनयतिपति
नलज्जमानाकथयतिनापिसखीजनायकिंचित् प्रसरतिमलयानिलेनवोढावहतिपरंतुचि
राय शून्यमंतः मध्याकलहांतरिताथथा विरमतिकथनंविनानखेदःसतिकथनेसमुपैति
कापिलज्जा इतिकलहमधोमुखीसखीभ्योलपितुमनालपितुंसमाचकांक्ष प्रौढाकलहांत
रिताथथा अकरोःकिमुनेत्रशोणिमानंकिमकार्षीःकरपल्लवातरोधं कलहंकिमधाःकुचार

KKSU LIBRARY
RAMTEK
441 106
M-1868
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सङ्गेहितमर्थेनविदंतिदेवदृष्टाः परकीयाकलहांतरिताथथा भर्तुर्यस्यकृतेगुरुलघुरभूद्धो
ष्टीकृतिष्टीकृताधैर्यकोपवलंगतंसहचरीनीतिःकृताद्दूरतः निर्मुक्तादृगवङ्कपापरिचिता
तोतस्तीविदुवक्त्रकोधादवधीरितोहृतधियामानवतीयान्तविधिः समान्यवनिताकल
हांतरिताथथा यत्पंकेरुहलक्ष्मपाणिकमलंभाग्यालयेयद्गुरुर्न्यस्तंकाममयद्वलाटफलके
भाग्याहरंवेधसा तत्सर्वंसखियोयथाधिमकरोत्तस्मिन्प्रकोपःकृतोविद्धांधिक्ममजीवितंधि
क्तनुधिक्चेष्टितंधिक्वयः संकेतनिकेतनेप्रियमनक्लेशसमाकुलहृदयाविप्रलब्धा
स्याश्चेष्टा निर्वृतनिश्वासरवीजनोपालंभचिंताक्रपातमूर्छादयः सुप्ताविप्रलब्धायथा क
लीभिःशपथैरनेककपटैःकुंजोदरंनीतयाशून्यंतच्चनिरीक्ष्यविक्रमितयानप्रस्थितंनस्थि
तं न्यस्ताःकिंचनकोटनीरजदृशाकुंजोपकंठेरुषाभ्राम्यद्भृंगकदंबकंवरचमत्कारस्पृशोहृद्य
यः मध्याविप्रलब्धायथा संकेतकेलिगृहमेत्यनिरीक्ष्यशून्यमेतादृशोनिष्टनिश्वसितावरा
याः अधीरंवचनमर्थविकाशिनेत्रंतांबूलमर्धकवलीकृतमेवतस्थौ पौरोहविप्रलब्धायथा
शून्यंकुंजगृहंनिरीक्ष्यकुटिलंविज्ञायचेतोभवंदूतीनाथनिवेदिताःसहचरीपृष्टाविनोदा
त्तया शंभोशंकरचंद्रशेखरहरश्रीकंठशूलिन्शिवत्र्यंबकेतिपरंतुपंकजदृशा भग्नीस्यच
क्रेस्फुटिः परकीयाविप्रलब्धायथा दत्वावैयसुजंगमूर्ध्निचरणावुच्चैर्घालज्जोनदीमंजीरु

॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यखिलांधकारपटलं तन्ध्यानहृष्टः प्रियः संतापाकुलयात्तयाच परितः पाथोधरे गर्जति क्रोधा
क्रांतकृतांतमत्तमहिषभ्रांत्यादृशौ योजिते सामान्यवनितापि पत्तलकायथा कपटवचनभाजा
केनचिद्वरयोषा सकलरसिकशौंडीकवंचिता सो इति विहसति रिंगद्भृंगविक्षिप्तचक्र
द्विकचकुसुमकांतिच्छन्ना केलिकुंजः संकेतस्थलं प्रतिभर्तुरनागमनकारणं याचिंतयति
साउत्का अवधिदिवसानागतप्रेयसि प्रोषितपतिका यांनाति व्याप्तिः तस्याभर्तुरवधिदिवस
मवसानागमननियमइति संकेतपदेन तद्यावर्तनात् अस्याश्चेष्टा अरति संतापजृंभांगकृ
शिकंपरुदितस्वावस्थाकथनादयः मुग्धाउत्कायथा यत्सा द्यापि समागतः पतिरिति प्रायः प
पेदे परामिदं चेतसि चिंतयंत्यपि सखीनां व्रीडया पृच्छति दीर्घं निश्वसिति दधाति चकितं न
प्रेक्षते केवलं किंचित्कपोलदुकूलं रुचिं धत्ते कपोलस्थलीं मध्याउत्कायथा भ्रातेतुं नगता
किमुप्रियसखी भीतो भुजंगात्किमु कुद्धो वा प्रतिषेधवाचि किमसौ प्राणेश्वरो वर्तते इत्थं कर्ण
सुवर्णकेतकरजः पातोपघातच्छलाद्दत्तोः कापि नवोढनीरजमुखी वाष्पोदकं मुंचति प्रौढाउ
त्कायथा भ्रातर्निकुंजसखि यूथरसालवंधो मातस्तमस्विनिपितस्तिमिरप्रसादं पृच्छामि किंचिद्दि
तिनीरधरमिरमोदमोदैः कथयत्किं न समाजगाम परकीयाउत्कायथा स्नानेवारिदकारि
मिविरचितो वासोघनेकानने शीतेश्वरनविद्रुमिर्मनसिजो देवः समाराधितः नीलाजगर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवक्षेनरजनीव्रीडाकृतादहिरागतपंकिंनतपस्यापिसकथंनाद्यापितेत्रातिथिः सामान्यव
नितासज्जायथा कथंनकांतःसमुपैतिकुंजमित्यंचिरंचेतसिचिंतयंती अस्तालयंतिपतदृक्ष
कारकारंगतकापिवनमिलाषात् अयंमेप्रियकारइतिनिश्चित्यसुरतसामग्रीसज्जीकरोति
यासावासकसज्जा वासकोवारः अस्याश्चेष्टा मनोरथसदीपरिहासदूतीप्रश्नसामग्रीसंपादन
मार्गविलोकनादयः मुग्धावासकसज्जायथा हारंगुंफतितारकांतिरुचिरंजघ्नातिकांचीलतांदीपं
न्यस्यतिकिंतुतत्रकरुणंनिहंनधत्तेपुनः आलीनामितिकासकस्यरजनौकामस्वरूपंकियांसाचि
त्रेरमुखीनवोदसमुखीदूरात्समुद्दीक्षते मध्यावासकसज्जायथा शिरसंदर्शयितुंकरोतिकुतुकारे
कल्लारहारसजंचित्रंपेक्षणकेनवेनकिमपिद्वारंसमुद्दीक्षते अहल्यापरणंनवंसहचरीभूषा
जिगीषामिषादित्यंपश्यतदृशःपतीयचरितंमेरानतोभूस्मरः प्रगल्भावासकसज्जायथा कृतेव
पुषिभूषणेचिकुरसंरक्षोरणीभूषिताकृताशयनसन्निवेशसुकवीटिकासंभृतिः अकारिहरिणीदृ
शाभरतमेयदेहत्विषासुरक्तनकवेतकीकुसुमकांतिभिर्दीप्तं मनोरथश्चयथा भावयोरंगयो
र्द्वैतेभूयोविरहविप्लवः अद्वैतेचसितस्फीतंनस्याद्न्योन्यवीक्षणं परकीयावासकसज्जाय
था श्वश्रूंस्वपयतिछलेनचतिरोधत्तेप्रदीपंकुरंधत्तेसौधकपोतपोतनिनदैःसंकेतिकुंचेष्टितं
शश्वत्पार्श्वविवर्तितांगलतिकंलोलकपोलद्युतिकापिकापिकरंबुजंप्रियधियानस्यातिकेन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यति सामान्यवनिता वासकसज्जा यथा चोलं नीलनि चोलकर्षण विधौ चूडामणिं चुंबने याचिष्ये
कुचयोः करपीडनविधौ कांचीं पुनः कांचनीं इत्थं चंदनचर्चितैर्मृगमदैरंगानि संस्कुर्वती तत्किं
यत्तमनोरथं विनमुने वारेषु वारांगना सहसाकृतकाकरप्रियतमा स्वाधीनपतिका भ्रस्याश्चेष्टा
वनविहारादिमदनमहोत्सवमदाहंकारमनोरथा वाक्प्रियभ्रमयः सुग्धा स्वाधीनपतिका यथा म
ध्येनकाशिमासनेनगरिमा देहेनकांतिमा श्रोणौनप्रथिमा गतौनजडिमा नेत्रेनकावक्रिमा ल
स्येनइदिमा नवाचिपटिमा हास्येनवा स्फीतिमा फणेशस्यनथा विभ्रमनिमनो मध्येव किंकार
णं मध्या स्वाधीनपतिका यथा यदपि रतिमहोत्सवेनकारो यदपि करेतचनी विधारणानि प्रि
यसखि पतिरेष पार्श्वदेशं नदयितमुंचति चेत किमाचरामि प्रौढा स्वाधीनपतिका यथा वक्त्रं
स्याधरपल्लवस्यवचसो हास्यस्यकास्यस्यच धत्यानामरविंदसुंदरदृशां कांतस्तनोति स्फुटं स्वप्ने
नापि नजल्पति क्रुतिपथं चेतष्यथं दृक्पथं काप्यन्यादयितस्यमे सखि कथं तस्यास्तमे दृग्द्वयः
परकीया स्वाधीनपतिका यथा स्वीयाः संति गृहे गृहे मृगदृशो यासां विलासक्रमं कांचीकुंडलहे
मकंकणरणत्कारेन विभ्राम्यति कोहेतुः सखिकानने सुरपथे सौधे सखी सत्तिवो भ्राम्यंती मपि
वल्लभस्य परितो दृष्टिर्न मां मुंचति सामान्यवनिता स्वाधीनपतिका यथा संत्येव प्रति मंदिरं मृ
गदृशो यासां सुधासागरस्तोमस्यूतसरोजसुंदरचमत्कारस्पृशो विभ्रमाः चित्रं किंतु विचित्रमत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घकलत्वेश्वहेतोः पुनर्वित्तं चित्तहरं घयन्नभिमुखमध्येवकिंकारणं स्वयमभिसरति प्रियमभि
सारयति कायाभिसारिका अस्योद्देश्या समयानुरूपभूषणशंकाप्रहानैपुण्यकपटसाहसाद
यश्चिपरकीयायाः स्वीयायास्तूपकृतस्वकर्मः सुखाभिसारिकायथा दूतीनिदुहपाणतोसहे
चरीराशिः सहस्थायिनीदेवकोदिशतिस्वनेनजलदः प्रस्थानवेलांशुभां वाचंमांजसिकीलनोति
निभिरसौमोघिभिश्चीरवैजीतोयंदयितामिसारसमयोमुग्धेविमुंचत्रपां मध्याभिसारिकायथा
भीतासितेवभुजगाद्रपथिमृदुलस्यसंजेपुनःकिमपिकंपसुखीकरोषि अंभोधरध्वनिभिरुक्त
भिलासितस्त्विमद्यचिसाचिवदसि किमचरामि प्रगल्भाभिसारिकायथा स्फुरद्दरहितजभार
भंगुरांगीकिसलयकोमलकांतिलापदेन अथकथयकथंसहेतजंतुंयदिनिशासुमनोरथोर
थःस्यात् परकीयाभिसारिकायथा रभसादभिसर्तुमुद्यतानांसेनितानांसविकारिहेविवसान्
रजनीदिवसोंधकारमचिविपिनेवेश्मविमार्गएवमार्गः ज्योत्स्नाभिसारिकायथा चंद्रोदयेच
दनमंडलेषु विहस्यवित्यस्यविनिर्जिता यः मनोविहंतुंमदनोपिकाणत्करेण कौंदनदिम
रंवभूव दिवाभिसारिकायथा पद्मिनीनामधिपस्यपंकजदृशंपर्कीलवामंवणेजाते सद्भूजनाभि
यः कृतमहोत्साहंपुरःप्रस्थिते सद्यांजस्थितयोर्विहस्यजनयोः शंकांतमत्रांतरेयूनोः खिन्नके
पोलयोर्विजयतेकोप्येषकंदर्पनहः सामान्यवनिताभिसारिका यथा लोलश्रोलचमत्कृतिप्रवि

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सस्कांचीलतालंकृतिन्यंचत्कंचुकवेषवेषुरगद्वलोजकुंभोन्नति स्फूर्जद्दिधितिविस्फुरद्गति
वस्त्वामीकरालंकृतिकौडकुंजरदृहंप्रयातिकृतितः कस्यापिकरांगना अथसुग्धायाःप्राधान्ये
नमध्यायालज्जामदनप्राधान्येनप्रगल्भायाःप्रकाशप्राधान्येनधीरायाःधैर्यप्राधान्येनअधीरया
अधैर्यप्राधान्येनधीराधीरायाः धैर्याधैर्यप्राधान्येनज्येष्ठायास्तेहाधिक्यप्राधान्येनकनिष्ठायाःस्ने
हन्यूनत्वप्राधान्येनपरोढायाःसंगुप्तिप्राधान्येनमुग्धायाइवकन्यकायाः सामान्यवनितायाःपृ
नप्राप्तिप्राधान्येनभ्रष्टविधनाधिकावगतमिति अत्रप्रस्थानंवलयैःकृतंप्रियसखेरखेरजसं
गतंधृत्यानक्षणमासितंव्यवसितंचित्तेनगंतुंपुरः गंतुंनिश्चितचेतसिप्रियतमेसर्वंसमंप्रस्थितं
गंतव्येसतिजीवितंप्रियसुहृत्साधीःकिमुत्यज्यते इत्यादिप्राचीनग्रंथकारलिखनादग्निमहाण
देशांतरानिश्चितगमनेप्रेयसिप्रोष्यपतिकाविनवमीनाधिकाभवितुमर्हति तथाहि तस्याःप्रोषि
तपतिकाविप्रलब्धोकाएकंतर्भावः भर्तुःसन्निधिवर्तिनीतु नकलहांतरितायामंतर्भावः कलहाभा
वादनवमानितपतिताचे नापिखंडितायामंतर्भावः प्रियस्यान्योपभोगचिह्नितस्यागमनाभावा
त् प्रियायाःकोपाभावदर्शनात्कांकुवचनकातरप्रेक्षणादिसूचितांतःपरुषतादर्शनाच्च नवा
सकसज्जायामंतर्भावः वासकसज्जीकरणाभावतिर्वेदादिदर्शनाच्चे नस्वाधीनप
तिकायामंतर्भावः अभिमतएवसंगविच्छेददर्शनात् नहिस्वाधीनपतिकायाःकदाचिदपिसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गविछेदर्शनदर्शितसंप्रश्रयः व्रजन्नपि पतिः स्वाधीनपतिका यानिरुच्यते अन्यथा भर्तरि स्वाधी
नत्वमेव तस्या नज्येत नेहत्यथा सर्वथा भर्तुर्विदेशगमनात् किंच निर्वेदाश्रुपातनिश्वासवनविहा
रादिसदनमहोत्सवाभावदर्शनाच्च नाप्यभिसारिका यामं तमभीतः अभिसारोत्सवाभावात् अंतस्ता
पदर्शनाच्चेति युक्तमुत्पश्यामः लक्षणं तु यस्याः पतिरन्यिमहरोद्देशांतरं यास्यत्येव तत्प्रोष्यत्पति
का अस्याश्चेष्टा काकुवचनकातरप्रेक्षणगमनविक्षेपदर्शनं निर्वेदसंतापसंमोहनिश्वासकाष्ठाद
यः सुखा प्रोष्यत्पतिका यथा प्रारोश्वरे किमपि जल्पति निर्गमाय कामोदरीवदनमानमयं चकार
आलीपुनर्निभृतमेत्य तनानिकुंजमुन्मत्तकोकिलकलध्वनिमानतान मध्या प्रोष्यत्पतिका यथा
जंतुं प्रियेवदति निश्वसितं नदीर्घमासीत्तवानयनयोर्जलमाविरासीत् आयुर्लिपिं पठितुमेणदृशः
परंतु भालस्थलीं किमुकचः समुपाजगाम प्रौढा प्रोष्यत्पतिका यथा नायं मुंचति संभ्रमं कमपि तत्तुल्या
गोदियोगज्वरतो नाहं विहितांजलिर्यदुपते पृच्छामि सत्यं वद तांबूलं कुसुमं पटीरमुदकं यद्वंधु निर्दाय
ते स्याद्दैवपरत्वतः किमु विषज्वालावली दुस्सहं परकीया प्रोष्यत्पतिका यथा न्यस्तं पत्तगमूर्ध्नि
पादयुगलं भक्तिर्विमुक्ता गुरोस्त्यक्ता नीतिरकारि किं न भवतो हेतोर्मया दुष्कृतं अंगानां शतयातना
नयनयोः कोपक्रमो रोरवः कुंभीपाकपराभवस्त्वमनसो युक्तं त्वयि प्रस्थिते सामान्यवनिता प्रो
ष्यत्पतिका यथा सुहृदं पदे हि वलयायभवद्वियोगमासाद्य यास्यति वहिः सहसा यदेतत् इत्यनिग

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हविजलन्नयनांबुधारावारांगना प्रियतमं करयोर्विभार अहितकारिण्यपि प्रिये हितकारिणी उन्न
मा अस्याः उन्नमैव सकलचेष्टा तद्यथा पतिः शयनमागतः कुचविचित्रितोरस्थलः प्रसन्नवच
नाम्भोरुहमपि वामभ्रुवा अचर्चि सुभगमिति शुचिपटीरपंकद्रवैरपूजि विलसद्विलोचनचम
कृतैरंबुजैः हिताहितकारिणि प्रियतमे हिताहितचेष्टावती मध्यमा अस्याः कथं व्यवहारकुशलिनी
चेष्टा कांतेसाभिलषितं कुरु कस्य शिक्षया सा चौकृतजीवया मुक्ताः कोपकषायमन्मथशरकूराः क
शलंकराः सकृतेदरहासकेसरवचोमाधीकवाराल सा प्रीतिः कल्पलतेव काचन महाशनीकृता
मुक्तका हितकारिण्यपि प्रिये अहितकारिणी अधमा एषैव च निर्मितिमित्तकोपना चंडी इत्यभिधी
यते अस्याः निष्कारणकोपकातरं अधमैव चेष्टा तद्यथा प्रस्थानेतव यः करोति कमलच्छायां सुखे
मेरुहे श्रीखंडद्रवधारया शिशिरयामार्द्रपुरः सिंचति तस्मिन्प्रेयसि विद्रुमद्रवनदीरिंडन्नरंगद्ध
मिश्रांतेक्रांतसरोजपत्रसदृशभ्रूयोद्दशाकुंचयसि विस्तरप्रियाप्रत्येकमेतासुत्तममध्यमाधम
मेहनोद्दाहन विश्वासविश्रामकारिणी पार्श्वचारिणी सखी तस्या मंदुनोपालंभशिक्षापरिहास
प्रश्नीनिकेमीति मंदुनंयथा स्तनकलकमहीधरोपकंठे प्रियकरपल्लवसुखेसत्रमोदं रहसि
मकरिकामिषाद्विरंतो कमलमुखी कमलैः सखी जघान उपालंभो यथा सांद्रधातेमुखरित
दिशः श्रेणयस्तोयदानां धारासारैर्धरणिवलयं सर्वतः प्लावयंति तेनत्रिदेवहति विपुलं मत्सखी

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्रमेव लंनिलेहो यरसिनदिदं नाथमेविस्मयाय शिक्षायथा सानंदमालिवनमालिविलोकनाय
निर्गच्छकुंजमिति किंनुविचारयेथाः भृंकारिणोमधुलिहो दिवसे भ्रमंति रात्रौ पुनस्तु पलचंचुपुटा
शुकोरः परिहासो यथा शृंगारमिश्रलिखिता सुनिवेदयस्तकः सप्रमोदशतमूर्तिषुलोकभर्तुः इ
त्थं सखीजनवचः प्रतिपद्य सद्यः सीनास्मितद्युतिमिसुत्तरमेयंचकार सख्याः परिहासवत्प्रियस्या
विपरिहासः भ्रूसंज्ञयादिशतिनत्विसखीनकाभिरित्थं विहस्यसुरवैरिणिभाषमाने एकाचिरायद
शनवाणदूयमानबिंबाधरावदनमानमयंचकार प्रियस्यपरिहासवत्प्रियायाः परिहासः यथा
दिव्यंवारिकथंयतः सुरधुनीमोलौकथंपावको दिव्यंतद्विलोचनंकथमहिर्दिव्यंसचोजेनव तस्मा
द्यूतविधौत्वयाद्यमुषितोहारः परित्यज्यतामित्थंशैलभुवाविहस्यसपितः शंभुः शिक्षयास्तवः हौय
व्यापारपारंगमाइनी तस्याः संघट्टनविरहनिवेदनादीनिकर्माणि संघट्टनंयथा श्रंचतिरजनि
रुदंचितनिमिरमयंवंचतिमनोभूः उक्तंनत्यजयुक्तंविरचयरक्तंमनस्तस्मिन् विरहनिवेदनंय
था चक्रेचंद्रसुरीप्रदीपकलिकाधात्राधरामंडले तस्यादेवकरादशापिचरमाप्रायः समुन्मीलति
तद्भूमः शिरसानतेनसहसाश्रीकृष्णनिक्षिप्तकं स्तेहस्तत्रयथातथानभवतिचेलोक्यमंधंतमः श्रृ
ङ्गारस्योभयनिरूपणान्नायकोपिनिरूप्यते सचत्रिविधः पतिरुपपतिर्वैशिकश्च विधि
वत्पाणिग्राहकः पतिः यथात्वंकीयूषमयूखमुंचशिशिरांशोनसुधांशोकरान्त्वंभोजांद्रविले

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसेकिमुक्ताभाजैः शनैर्वीजय त्वं स्वकीहिनिकिंचसिंचसलिलैरंजैः शिरीषोपमैः सेयं शेलसु
ता कठोरमहसः कांत्यापथिक्लाम्यति अनुकूलदक्षिणाभृशशठमेदात्पतिश्चानुकी सर्वकालिक
परांगनापरोऽनुरक्तेसति सर्वकालमनुरक्तोऽनुकूलः यथा पथिकांभवकोमलादिनमरोक्षेरे
त्यमंगीकुरुत्वंवर्मनेलघुतां प्रयाहिपवनत्वंवेदसुकारय सान्निध्यंश्रयदंडकावनजिरेनिर्जछ
मार्गद्वहिः सीतासोविपिनंमयासहयातोनिर्गतुमुत्कंठते सकलनायिकाविषयकसमसहजा
नुरागोदक्षिणः यथा स्तनपुरः स्फुरतिपद्मदृशांसहस्रमहिद्वयंकथयकुत्रनिवेशयामि इत्याक
लय्यनयनांबुरुहेनिमील्यरोमांचितेनवपुषास्थितमच्युतेन भूयोनिशंकमुनहोपिभूयो
निवारितोपिभूयःप्रश्रयपरायणोभृशः यथा वह्नेहरेः करकमलयोर्द्वीरतोकारितोपि सापंक्ष
वापुनरुपगतोदूरतोदत्तदृष्टिः तस्योपांतेकनकवलयंमुक्तमन्तेषयंत्यादृशोभृशः पुनरपित
यापार्श्वेस्वप्रसुप्तः कामिनीविषयककपटपटुःशठः मौलौदामविधायभालफलकेव्याप्ति
त्यपत्रावलीं केयूरंभुजयोर्निधायकुचयोर्विन्यस्यमुक्तास्रजं विश्वासंसमुपार्जयन्मृगदृशः
कांचीनिवेशच्छलान्नीविंग्रंथिमपाकरोतिमृदुनाहस्तेनवामभ्रुवः आचारहानिहेतुः पतिरु
पपतिः यथा शंकाशंखलितेनयत्रनयनप्रांतेनसंपेक्ष्यतेकेयूरध्वनिभूरिभीतिचकितंतो
यत्रचाश्लिष्यते नोकायत्रशनैरलग्नदशनंबिंबाधरःपीयते नोकायत्रविधीयतेनमणितंत

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकिरतंकामिनोः उपपतिरपिचतुर्थी परंतुशठतानत्रनियता वक्रुवेश्योपभोगरसिकोवैशे
षिकः यथा कांचीकलकलितकोमलनाभिकांतिपारावतधवलचित्रितकंठपाशिं उद्वांतलो
चनचकोरमसंजरंगमाशास्महेकमपिचासविलासवत्याः वैशेषिकस्तुउत्तमाधममध्यमभे
दात्त्रिधा दयितायाभूयःप्रकोपेप्युपचारपरायणउत्तमः यथा चक्रध्वांतमुद्दीक्ष्यपत्मसदृशः
शोणारविंदश्रियंनोचेज्जस्यतिसत्यितंविनतुतेऽहंतानिकीर्तिनका तस्योपांतमुपेत्यकिंतुपुल
कभ्राजत्कपोलद्युतिः कांतःकेवलमानतेनशिरसासुक्तासजंशुंफति प्रियायाःप्रकोपेचेद्
यामनोभवंदहतिसमध्यमः यथा अस्यंयद्यपि हास्यवर्जितमिदंलास्येनवीतंवचो नेत्रं
शोणसरोजकांतिनदधिकापिहरांस्थीयतां मालायाःकरणोद्यमोमकरिकारंभः कुचांभोजयो
र्द्वंद्वःकुंतलधोरणीषुसदृशः सायंतनोदृश्यते भयदयालज्जाशून्यःकामक्रीडायामकृतकृत्या
कृत्यविचारोऽधमः उदयतिहृदियस्यनैकलज्जा नचकरुणानचकोपिभीतिलेशः वकुलसुकु
लकोपकोमलांपुनरपितस्यकरेनपातयेयाः मानीचतुरश्चशठश्चकांतभवति मानीयथा
कस्याकृतपरायणंतववचोवज्रोपमेयंमनः कस्तावाचमिमामपास्यवितयंव्याजाद्बहिःप्र
स्थिते प्रातर्वीतविलोकनेपरिहतालापेविरक्तानने प्राणेशेनिपतंतिहंतकृपणाकामम्बुवोदृष्टे
यः वचनचेष्टाव्यंग्यसमागमेचतुरः वचनव्यंग्यसमागमोयथा तमोजडालेहरिदंतरालेकाले

॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशायास्तवनिर्गतायाः तदेतद्दीनं निकटे वनानां चटेतशाखोदरिकः सहायः चेष्टाश्चेष्यस
माजमेयथा कांतेकनकजंवीरंकरेकिमपिकुर्वति आगारलिखितेभानौविहसिंहमुखीदहो
प्रोषितप्रतिरूपपतिर्वैशेषिकस्वांतर्भवति कमेणोदाहरणानि ऊरुरंभादृगपिकमलंशैव
लंकेशपाशोवक्रंचंद्रोसपितमस्तंमध्यदेशोमृणालं नाभिःकूपोवलिरपिसरित्पल्लवःकिंच
पाणिर्यस्याःसाचेदरसिनकथंहंतिनापस्यशंभिः योंत्यास्मरसलिलकेलिकुतूहलायव्याजाद
पेत्यमयिवर्त्मनिवर्तमाने भ्रंतःस्मितद्युतिचमत्कृतिदृक्तरंगैरंगीकृतंकिमपिकामदृशःस्मरा
मि भ्रूभृतपरिपतत्तिलोलवंधंसुचिरनकारमवक्रदृष्टिपातं प्रकटहसितमुक्तनास्यचिंवपु
रसुदृशःस्मरचेष्टितंस्मरामि अनभिज्ञोनायकोनायकाभासस्व यथो शृंग्येसद्भानियोजिता
वहुविकामंजिर्वनंनिर्जितंपुष्पव्याजमुपेत्यनिर्गतमधस्फारीकृतादृश्यः तांबूलाहरणछलेन
विहितोव्यक्तौचवलोसहावेनेनापिनवेत्तिइतिक्रियतायत्तेनसज्ञास्यति नचनायिकाइवना
यकस्येतेभेदाःसंहितिवाच्यं तस्याअवस्थाभेदेनभेदातस्यचस्वभावभेदेनभेदाइतिविशे
षात् अनुकूलदक्षिणधृष्टशठइतिचत्वारस्वनायकस्यस्वभावाः अन्यच्च अवस्थाभे
देनयदिनायकस्यभेदःस्यात्तदोत्कविप्रलब्धखंडितादयोनायका अपिस्वीकर्तव्याः तथाचसं

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

केनचिद्वस्थायां स्त्रीणामलाभसंप्रदायात् अन्यसमागमशंकाभूमित्वं चान्यसंभोगचिह्नितत्वं च
नायिकानां ननुनायकानां तास्वप्रतिनिद्रुद्भवेरसाभासापत्तेरिति केचन मीसचिव पीठमर्दविट
चेटकविदूषकमेरात्पंचधा कुपितस्त्रीप्रसाधकः पीठमर्दः सखा मीसचिव इति पीठमर्दीय
था कोयं कोपविधिः प्रयच्छ करुणागर्भं विलोकयतो पीयूषद्रवदीर्घिकापरिमलैरामोदिनी मेदिनी
भ्रास्तां वा स्पृहया स्तु लोचनमिदं व्यावर्तयंतीमुहुर्यस्मैकुप्यसि तस्य सुंदरि तपो वंदामि वंदामहे
कामतंत्रकलाकोविदो विटः आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृंगः स्फुजति मै
रवं न हि करं प्रारोश्वरो मुंचति एते सिद्धरसाः प्रसूनविशिखो वेद्यो नवद्योतको मानव्याधिरसौ कृ
शोदरि कथं त्वच्चेतसि स्थास्यति संधानचतुरश्चेटको यथा सा चंद्रसुंदरमुखी सचनंदनुः देवा
न्तिकं जभवनं समुपाजगाम अत्रांतरे सहचरस्तरणौ कठोरे पानीयपानकपटेन सरः प्रतस्थे
भृंगादिवैकृत्यैहीस्यकारी वैदूषकः यथा आनीयतारजमुखी शयनोपकंठं सुकंठि तोस्मि कुच
कंचुकमोचनाय अत्रांतरे सुहृत्कारी विदूषकेण प्रातस्तनस्तरुणकुक्कुटकंठनादः स्तंभस्वे
दोथरोमांचस्वरभंगोथवेपथुः वैवर्ण्यमश्रुप्रलापश्च इत्यष्टौ सात्विकाश्रुणाः यथा मेहोवाचिदशो ॥१२॥
जिलंकुचतटे स्वेदः प्रकंपोधरे पांडुर्ऊरुतटी वपुः पुलकितं लीनं मनस्तिष्ठति आस्यं नयन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रियश्चरणयोस्तंभः समुज्जृंभते तत्किं राजपथे निजामवरणीपालोयमालोकितः रतिस्थायि
भावः शृंगारः स च द्विविधः संभोगो विप्रलंभश्च संभोगो यथा वियति विलोलति जलदः स्फुरति
विधुश्चलति कूजति कपोतः निष्पतति तारकातति रालोलति वीचिरमरकाहिन्याः विप्रलंभो
यथा प्रादुर्भूते नवजलधरे संपतेद्दृष्टकामः प्राणाः पंकेरुहदलदृशः कंठदेशे प्रयांति अन्य
त्किं वा तव मुखविधुं दृष्ट्वा मुद्रीयते चक्षुः पद्मं सज्जति विशिनीपल्लवस्यच्छलेन विप्रलंभे च
अभिलाषचिंतास्मृतिगुणकीर्तनोद्वेगप्रलापोन्मादव्याधिजडतानिधनानि दशावस्थाभवंति त
त्र संगमेच्छा अभिलाषः यथा तस्याः सतनुसरस्याः चेतो नयनं च निष्पतितं चेतो गुरुनिमग्नस्त
दुभयनं सर्वतो भ्रमति दर्शनसंतोषयोः प्रकारजिज्ञासा चिंता यथा मया विधेयो मुहुरयमभि
नवकुंजोपकंठे कलकंठनादः राधामधोर्विभ्रममावहंती कुहीतनेत्रोत्पलतोरणानि प्रियाश्रित
चेष्टानुद्वेषसंस्कारजन्यज्ञानं स्मृतिः यथा रामोलक्ष्मणदीर्घदुःखचकितो नाविष्करोति व्यथां
श्वासं नोत्सृजति रुजति सलिलं धत्ते न वा चक्षुषि कालावतीविवर्तमानमदनक्रूरैरनंगज्वरैः हा
मः किंतु विदेहराजतनयां भूयः स्मरन्वर्तते विरहकालीनकांताविषयकप्रशंसाप्रतिपादनं
गुणकीर्तनं यथा स्पर्शस्तनतटस्य शीतकरणैर्वक्त्रे हरणे तस्याः केलिकथालापसमयः सम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः सर्वे कामक्लेशजनितसकलविषयहेयताज्ञानमुद्देशः यथा जरसद्रुमकंदमिंदुबिंबकरणावरिजवारणोवसंतः रजनीस्वरभूपतेः कृपाणीकरणीयं किमतः परं विधातः प्रियाश्रितकास्मनि कव्यवहारः प्रलापः कल्पनायाः कारणमंतष्करणविक्षेपः तस्यचाभिलाषसुत्कंठा यथा अद्य संवीक्षणं चक्षुरद्य संमिलितं मनः अद्य संस्पर्शनः पाणिरद्य मे किं करिष्यति श्रोतृकथासंलापादिकारितमनोविपर्यासस्सुप्रियाश्रितव्यापारउन्मादः व्यापारः कायिको वाचिकश्च कायिको यथा प्रतिफलमपृतांशोः प्रेक्ष्य कांतोमृगाक्ष्याः मुखमिति परिहासं कर्तुमभ्युद्यतोभूत् अथ शिथिलितवाचो मानमाशंकमानस्याः स्पृशति पुलकमाजा पाणिपंकेरुहेण वाचिको यथा किं रे विधे मृगदृशो मुखमद्वितीयं कंदर्पदर्पसिदृगंबुजमत्यहेव भ्रूकारमावहसि भंगतनुर्नतादृक् कर्मीणधिक्तपुसरीदृशमीक्षणीयं मदनवेदनासमुद्यसंतापदोषो व्याधिः यथा कोदंडं शिशिरवेमनोनिवसतिः कामस्य [illegible] तस्याश्चपिबूवल्लीनयनांचलं मनसितेवासः समुन्मीलति इत्यं साम्यविशेषयोः प्रभवति स्वामिं तथा त्वित्यां तन्वाना तनुतां क्रमादनतनुतां तेषां यथाश्छति विरहव्यथाविष्कारमात्रमावेद्यजीवनावस्थां जडता यथा पाणितीरवकंकणः स्वनति हंतिष्ठं पमतांशुकादृष्टिर्निश्चं [illegible] तारकासमभवत्स्मांडवकुंडलं कश्चित्रार्पितयासमंकृशतनोर्मेरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेन्नो यदि तन्नामस्मरणेन को विपुलकारंभः समुज्जृंभते स्वप्नचित्रसाक्षाद्देवनदृशीनं त्रिधा
स्वप्नदर्शनं यथा मुक्ताहारं नकुचजिरेः कंकणं नैव हस्तात् कर्णात्स्वर्णभरणमपि कानीनकान्नैव
तावत् अद्य स्वप्ने वकुलमुकुलं संदधानः करेण कोयं चौरो हृदयमहरन्नन्वितस्तप्रतीमः चित्र
दर्शनं यथा नीवीं हरेदुरसिजं विलिखेन्न खेन दंतच्छदं चदशनेन दशेदकस्मात् इत्थं पटे विलि
खितं दयितं विलोक्य वाल्लपुरे वनजहारविहारशंकां साक्षाद्दर्शनं यथा चेतश्चंचलतां त्यज प्रिय
सखि व्रीडेन मां पीडय भ्रान्तश्चंचदशो निमेषभजवन्कामस्य तस्यतां वह्निर्भूर्निकणयोः
कुवलयं वंशं दधानः करे सोयं लोचनगोचरो भवति मे रामो दरः सुंदरः माध्वीकस्य दसंदोहसु
दरं रसमंजरीं कुर्वंतु कवयः कर्णभूषणं कृपया मम तातो यस्य जगेश्वरः कविकुलालंकारचूडा
मणिर्देशो यस्य विदेहभूः सुरसरिक्षोलकिमीरिता पद्येन स्वकृतेन तेन कविना श्रीभानुना यो
जिता वाग्देवी कृतिपारिजातकुसुमस्य मंजरी इति कविकुलालंकारचूडामणिश्री
भानुदत्तविरचितारसमंजरी संपूर्णतामगात् अथ कथामिजुरेवतीतंयशो नगातं रघुनं
दनस्य परेतभर्तुः परिषत्प्रवेशमयाविधेयो वहकप्रकारः १ गौडान्वयसमुद्भूताश्यामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एनमं०
॥२५॥

माकाचिन्तितेविनी प्रणेशप्रीतिजननीव्यक्तिखड्समंजरी संवत् १८० काशीपतयेनमः॥

॥१४॥

KKSU LIBRARY
RAMTEK
441 106
M-1868
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

28.

[OrderDescription]
,CREATED=20.10.20 15:16
,TRANSFERRED=2020/10/20 at 15:21:00
,PAGES=28
,TYPE=STD
,NAME=S0004238
,Book Name=M-1868-RASMANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection